International Journal of Sanskrit Research 2017; 3(5): 60-64

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(5): 60-64
© 2017 IJSR
www.anantaajournal.com
Received: 15-07-2017
Accepted: 18-08-2017

**डॉ. सीताराम गुर्जर**
सह आचार्य (साहित्य)
राजकीय शास्त्री संस्कृत
महाविद्यालय, दौसा, राजस्थान,
भारत

**Corresponding Author:**
**डॉ. सीताराम गुर्जर**
सह आचार्य (साहित्य)
राजकीय शास्त्री संस्कृत
महाविद्यालय, दौसा, राजस्थान,
भारत

# कठोपनिषदनुसारं शिक्षायाः वैशिष्ट्यम्

## डॉ. सीताराम गुर्जर

**सारांश**
वर्तमाने भारतीयशिक्षणपद्धतौ पाश्चात्यसंस्कृतेः प्रभावः स्पष्टरूपेण दृश्यते । वस्तुतः भारतीयशिक्षाप्रणाल्यां पाश्चात्यप्रक्रियायाः अनुसरणं क्रियते चेत् भारतीयशिक्षायां या सहजता दृश्यते सा निश्चयेनापगच्छति । यतो हि कृत्रिमतायाः प्रभावेणान्विताशिक्षा केवलं सङ्कुचितार्थमेव प्रकटयति । एतादृश्यामवस्थायां शिक्षायाः भारतीयकरणमावश्यकम् । यदि भारतीयशिक्षण-पद्धत्यानुगुणं शास्त्रे निहितानां नैतिकादिशैक्षिकतत्त्वानां समावेशो क्रियते चेत् शिक्षा समाजस्य विकासे आधारस्य प्रस्तरो भविष्यति । एतदर्थं वेदेषु, पुराणेषु, विविधशास्त्रेषु निहितानां सिद्धान्तानां परिशीलनं निश्चयेन कर्तव्यम् । तथैव कठोपनिषद्यपि बहूनि शैक्षिकतत्त्वानि निहितानि वर्तन्ते । तैः अस्माभि ज्ञातव्यानि -

**कूटशब्दः** कठोपनिषदनुसारं शिक्षायाः वैशिष्ट्यम्, सामान्यार्थे शिक्षा, विशेषार्थे शिक्षा

## प्रस्तावना
कठोपनिषदनुसारं शिक्षायाः तात्पर्यं प्रकारद्वयेन ज्ञातुं शक्यते ।
1. सामान्यार्थे शिक्षा ।
2. विशेषार्थे शिक्षा ।

## सामान्यार्थे शिक्षा
सामान्यार्थे शिक्षा गुरुशिष्ययोर्मध्ये प्रचलिता काचन प्रक्रिया वर्तते । कठोपनिषदि ऋषिः वाजश्रवा सर्वमेधयागस्यायोजनं कृतवान् । यागानन्तरम् ऋषिः ब्राह्मणेभ्यः जीर्णाः शीर्णाश्च गाः अददात् । तस्य पुत्रस्य नचिकेताख्यस्य मनसि पितृहितकामना जायते । सः द्वित्रिवारं पृच्छति यत् मां कस्मै दास्यति इति । क्रोधेन पिता तं मृत्यवे ददामीति वदति । अनन्तरं स मृत्युगृहं गत्वा दिनत्रयं यावत् निराहारमेवोषित्वा ज्ञानप्राप्तेः जिज्ञासां प्रकटयति । अनेन वृत्तान्तेन स्पष्टं भवति यत् शिक्षा एका प्रक्रिया वर्तते यां च शिष्यानुगुणं गुरवः कल्पन्ते । अत्रेदन्तु स्पष्टं वर्तत एव यत् शिक्षाप्राप्ते निमित्तं न कश्चित् विशेषमान्यपाठ्यक्रमः, यदा शिक्षार्थिनि ज्ञानप्राप्तेः जिज्ञासा जायते तदैव गुरुं समीपे उपविश्य यावत्पर्यन्तं शङ्कासमाधानं पूर्णरूपेण न जायते तावत्पर्यन्तं शिक्षा अपूर्णा । अत्र हि गुरवः छात्रेषु व्यवहारपरिवर्तनार्थं यावच्छक्यम् आयासं विदधति ।

परमत्रावधेयमिदमस्ति यच्छात्राः प्रारम्भिकी शिक्षा गृहे एव अभवत् अर्थात् यावत्पर्यन्तं गुरूणां गृहे गमनस्य वेला तत् पूर्व शिष्याणां शिक्षा गृहे एव भवति स्म । तदानीमे विद्यार्थिनः गुरुगृहं गन्तुं योग्याः भवन्ति । जीवनस्य प्रमुखकाले गुरु: छात्राणां जिज्ञासानां यथोचितम् उत्तरं प्रदाय तेषां व्यवहारे परिवर्तनमानयतीति सामान्यार्थे कठोपनिषच्छिक्षाया: तात्पर्यम् ।

**विशेषार्थे शिक्षा**

विशेषार्थे शिक्षायाः तात्पर्यमस्ति मनुष्यमात्रस्य पूर्णत्वेन विकासः । पूर्णविकासमाधारीकृत्यैव कठोपनिषदि पाठ्यक्रमस्य कल्पना । पाठ्यक्रमे किं पठनीयं येन इहामुत्र सुखादिसाधनानामुपलब्धिः स्यात् इति जिज्ञासायां लौकिकयोगक्षेमाय प्रेयस् इति तत्त्वस्य कल्पना वर्तते । प्रेयसि च लौकिकविषयाणाम् अर्थात् गणितशास्त्र-अर्थशास्त्र-नीतिशास्त्र-शिल्पशास्त्र सङ्गीतशास्त्रादीनां विवेचना भवति। अर्थात् ये मनुष्याः बाह्यचाकचक्येन आकर्षिता: तेषां कृते एतादृशानां विषयाणां कल्पना कृताऽस्ति । ये जनाः स्वकीयपरलोकं साधयन्ति तेषां कृते 'श्रेयस्' इति पाठ्यक्रमस्य कल्पना । एतस्य पाठ्यक्रमस्य कृते असाधरणबुद्धयान्वितां योग्यानां शिक्षार्थिनाम् आवश्यकता भवति । ये विषयमवगम्य निदिध्यासनेन विषयं आत्मसात् कुर्वन्तु इत्याशा । प्रेयसः इति तत्त्वं संसारीकरणमाचष्टे तथा 'श्रेयस्' इति आध्यात्मिकं किमपि तत्त्वं प्रकटयति । यदा विचारशीलानां मनुष्यानां समक्षे द्वयोरपि तत्त्वयोः समुपस्थितिः जायते तदा ते गुणदोषपुरस्सरं 'श्रेयस्' इत्यस्यैव चयनं विधाय स्वाध्यात्मिकोन्नतिं प्रकटयन्ति । यथोक्तं तत्रैव -

"श्रेयश्च प्रेयश्च मनुष्यमेत स्तौ सम्परीत्य विवनक्ति धीरः। श्रेयो हि धीरोऽभि प्रेयसो वृणीते प्रयो मन्दो योग क्षेमात् वृणीते" [1] ।।

शिक्षायाः अभिप्रायो ऽयमितोऽपि शाङ्करभाष्येण स्पष्टतां गच्छति –

"यद्युभे अपि कर्तुं स्वायत्ते पुरुषेण किमर्थं प्रेय एवादत्ते बाहुल्येन लोक इत्युच्यते सत्यं स्वायत्ते तथापि साधनतः फलतश्च मन्दबुद्धीनां दुर्विवेकरूपे सती व्यामिश्रीभूते इव मनुष्यमेतं पुरुषमा इतः प्राप्नुतः श्रेयश्च प्रेयश्च । अतो हंस इवाम्भसः प्रयस्तौ श्रेयः प्रेयः पदार्थो सम्परीत्य सम्यक् परिगम्य मनसालोच्य गुरुलाघवं विवनक्ति पृथक्करोति धीरो धीमान् । विविच्य च श्रेयो हि श्रेय एवाभिवृणीते प्रेयसोऽभ्यर्हितत्वात् । कोऽसौ धीरः । यस्तु मन्दोऽल्पबुद्धि स विवेकसामर्थ्याद्योगक्षेमनिमित्तं शरीराद्युपचयरक्षण निमित्तमित्येतप्रेयः पशुपुत्रादिलक्षणं वृणीते" । (क.शा.भा. - १.२.२)

अत्रेदं ध्यातव्यमस्ति यत् 'प्रेयस्' इति तत्त्वस्य न कुत्रापि निन्दा, अपितु 'प्रेयस्' इति तत्त्वस्य स्वीकर्तृनामेवावरत्वम् । जगतः सञ्चालनार्थं 'प्रेयस्' इत्यस्यापि महन्महत्त्वम् ।

'श्रेयस्, प्रेयस्' चेत्यनयोरपराभिधानमस्ति विद्या, अविद्या च । अविद्या वर्तते ऐहलौकिकोन्नत्यर्थम् । पुनश्च विद्या वर्तते पारलौकिकोन्नयनाय । यथा -निम्नोक्तेन मन्त्रेण सिद्धयति -

"दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता । विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त" [2] ।।

एवम्प्रकारेण श्रेय: प्रेयसोः विद्याविद्ययोः परापरयोश्च तात्पर्यं समानमस्ति। अपराविद्या संसारे व्यक्तिं साधनसम्पनं करोति, परा च व्यक्तेः परलोकं साधयति । अत्र नचिकेतसः पराविद्यां प्राप्त्यर्थं प्रयासः । सः सांसारिकभोगान्प्रति न गत्वा परमोन्नतिं साधयति । अत एव वास्तविकार्थे शिक्षा वर्तते श्रयेस: प्राप्तिः । तत्प्राप्तकरणार्थं भवत्यावश्यकता आत्मानुशासनस्य । विना आत्मानुशासनेन श्रेयसोंऽशमात्रमपि न ज्ञायते । आत्मानुशासनं नाम वर्तते इन्द्रियाणां नियन्त्रणं पुरस्सरस्वात्मनि निहितशक्तेर्ज्ञानम् । अत एव कठोपनिषदनुसारं शिक्षाया तात्पर्यं वर्तते आत्मानुशासनेन श्रेयसः प्राप्तिरिति ।

**कठोपनिषदनुसारं शिक्षोद्देश्यानि**

कठोपनिषद: शिक्षोद्देश्यानि आधुनिकयुगस्य शिक्षोद्देश्यैः सह साम्यं धारयन्ति । विशेषत: भारते भारतीयशिक्षाआयोगः भौतिकविकास-शारीरिकविकास-मानसिकविकास-भावात्मकविकास-सामाजिकविकासादीनि किञ्चाध्यात्मिमूल्यानां विकास इति शिक्षोद्देश्यानि मनुते । किञ्चित्परिवर्तनेनैतानि सर्वाण्यपि कठोपनिषदि मिलन्ति । एतादृश्यामवस्थायामुपनिषदीयशिक्षायाः उद्देश्यानि व्यापकानि सर्वकालीनानि च वर्तन्ते । मनुष्यस्य सम्पूर्णविकासोऽत्र परिलक्षितः भवति । प्रसङ्गेऽस्मिन् स्वामिरङ्गनाथमहोदयः लिखति "उपनिषदः मनुष्यस्य बाह्यान्तरिकरूपयोः सुखसमृद्ध्यर्थम् आध्यात्मिकसंदेशं ददति । अनेन मनुष्यस्य चरित्रस्य व्यक्तित्वस्य च पूर्णविकासो भवति" [3] ।

शिक्षासम्प्रत्ययस्य स्पष्टीकरणं शिक्षोद्देश्यैर्भवितुमर्हति इत्याशया कठोपनिषदि निहितशिक्षोद्देश्यानि इत्थं प्रस्तूयन्ते

**ब्रह्मतत्त्वस्य श्रेष्ठताप्रतिपादनम्**

गुरुकल्पः यमः स्वशिष्यं नचिकेतसं ब्रह्मतत्त्वस्य श्रेष्ठतां प्रतिपादयन् कथयति स्वोपदेशे यत् यः प्राकृतिकगुणैः सर्वथारहितो परधाम्नि विराजमानः स्वयं प्रकाशस्वरूपः पूर्णब्रह्मपुरुषोत्तमः वर्तते, स एव अन्तरिक्षे विचरणकर्ता वसुनाना ज्ञायते। स एव अतिथिरूपेण समेषां गृहेषूपस्थितो भवति । स एव यज्ञवेदिप्रतिष्ठितः । ज्योतिर्मयः अग्निरूपात्मकः, होता, सर्वभूतेष्वात्मरूपव्यक्तः, सत्यप्रतिष्ठितः, मतस्यादिरूपे उपस्थितः, पृथिव्यां वृक्षाङ्कुरौषद्यादिरूपे प्रतिष्ठितः, यागस्य फलरूपे विद्यमानः, पर्वतनद्यादिरूपात्मकः ब्रह्म वर्तते । तस्यैव महिना जगत: गतिः । एवम्प्रकारेण सर्वासु दृष्टिषु स एव महिमानं धारयति। यथोक्तं कठोपनिषदि -

"हँ स शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजाऋतं बृहत्" [4] ।।

तत्ब्रह्म यत्किमपि प्रचलितं वर्तते तस्य सर्वस्यैव नियामकं वर्तते । तस्येच्छया विना कोऽपि श्वासमपि स्वीकर्तुं न पारयति। यथोक्तमेकस्मिन् मन्त्रे -

"ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति ।
मध्ये वामनमासीनं विश्वे देवा उपासते" [5] ।।

एवम्प्रकारेण प्रायश: प्रत्येकस्मिन् मन्त्रे ब्रह्मतत्त्वस्य श्रेष्ठताप्रतिपादनं तत्रस्थायाः शिक्षायाः प्रमुखं ध्येयम्।

**आध्यात्मिकविकास**

कठोपनिषदि शिक्षया क्रियते परमतत्त्वस्य सिद्धिः । नचिकेता स्वकीयेषु त्रिषु प्रश्नेषु तृतीये प्रश्ने आध्यात्मिकोन्नर्तिं लक्ष्यीकृत्य प्रश्नं करोति। किञ्च अध्यापकः मृत्युः तस्य दृढां प्रतिज्ञां दृष्ट्वा आत्मतत्त्वस्य स्वरूपं प्रतिपादयति।

"न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।
अजो नित्यो शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे" ।।

अत्र यमः आत्मनः शुद्धस्वरूपं वर्णयति किञ्च तस्य नित्यताया अपि व्याख्यां करोति । यावत्पर्यन्तं शिष्यः शरीरम् आत्मनः पृथक् न मनुते तावत्पर्यन्तं वैराग्यं नोदेति। वैराग्यं विना तस्य मनसि नित्यतत्त्वस्याभिलाषायाः विकासो न जायते। यदि साधकः दृढरूपेण अवगच्छति यत् जीवात्मा नित्यचेतनस्वरूपा। किञ्च भोगैस्सह अस्य नास्ति कोऽपि सम्बन्धः तदेव सः भवति ब्रह्मप्राप्तेः अधिकारी। ये जनाः आत्मानं हन्तादि मन्यन्ते ते न जानन्त्यात्मतत्त्वम् । वास्तविकार्थे आत्मतत्त्वस्य स्वरूपं किमप्यनिर्वचनीयम् -

"हन्ता चेत् मन्यते हन्तुँ हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नाय हन्ति न हन्यते" [6] ।।

श्रीमद्भगवद्गीतायामपि अध्यात्मतत्त्वमिदम् इत एव स्वीकृतं वर्तते इति प्रतीयते । तत्र मन्त्रेषु द्वित्रा शब्दा परिवर्त्य पुनरावृत्तिः दृश्यते । एवम्प्रकारेण कठोपनिषदि आध्यात्मिकविकासाय महती गवेषणा वर्तते । किञ्च वस्तुतथ्यस्य समुचितं वर्णनं विधायाध्यात्मतत्त्वस्योन्नतिरस्या अपरमुद्देश्यम्।

**नैतिक भावनायाः विकास**

कठप्रसङ्गे कानिचन स्थलानि वर्तन्ते यत्र नैतिकभावनाया: प्रत्यक्षाप्रत्यक्षणरूपेण परिपुष्टिः दृश्यते । ऋषि: उद्दालकः सर्वमेधस्यायोजनं करोति । दक्षिणाप्रदान समये स दक्षिणायां न्यूनतां प्रदर्शयति। तत्रैव पितृकहितकाङ्क्षिपुत्रः सम्यक् दातुं नोक्त्वा मां कस्मै दास्यति इति प्रतिवचति । पित्राज्ञानुसारं नचिकेता मृत्युम् उपगच्छति । अत्र पित्रो: वचनपालनरूपा या शिक्षा मिलति सा नैतिकरूपा। मृत्युगृहे सः निराहारं त्रिदिवस यापयति। मृत्योरागमनसमये तस्याः पत्नी प्रबोधयति आतिथ्याय स्वामिनम् - हे सूर्यपुत्र ! शीघ्रं ब्राह्मणबालकाय पादोदकमानय । सः अतिथिरूपेण समागतः त्रिदिवसात् भवत्प्रतीक्षायामनशने उपविष्टो वर्तते। यदि भवान् तस्य परिचर्यां करिष्यति तदैव शान्तिं प्राप्नोति

"वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् ।
तस्यैता शान्तिं कुर्वन्ति हर वैवस्वतोदकम्" [7] ।।

यस्य गृहे अतिथिः निराहारो तिष्ठति तस्य कृते ईप्सितानां फलानां प्राप्तिः न भवति। भवतु नाम पदार्थानां प्राप्तिः परं

सुखस्य प्राप्तिः कदापि न जायते । तेन कृतानि पुण्यकार्याण्यपि नष्टानि जायन्ते -

"आशा प्रतीक्षे संगतँ सूनृतां च इष्टापूर्तेपुत्र पशूश्च सर्वान्। एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे" [8] ।।

नचिकेतसः सर्वे प्रश्नाः जगत्कल्याणाय । तावत् प्रथमे प्रश्ने स क्रोधशान्त्याः वरं प्राप्नोति । स्वात्मविकासाय क्रोधनियन्त्रणमत्यावश्यकम् । गीतायामपि श्रीकृष्णः "क्रोधात् भवति सम्मोहः" इत्यादिभिः क्रोधनियन्त्रणस्य वार्तामकथयत् । द्वितीये प्रश्ने सः यज्ञादिकर्मविधानं पठति । अर्थात् कर्मणः शिक्षां प्राप्नोति । निष्कामकर्म विना न मनुष्यस्य गतिः । तृतीये प्रश्ने स जगत्कल्याणाय अध्यात्मज्ञानप्राप्त्यर्थं यतते । एवम्प्रकारेण अन्यस्थलेष्वपि नैतिकशिक्षायाः दर्शनं भवति ।

**त्यागभावनायाः विकास**

प्रतीकात्मकाख्यानेऽस्मिन् त्यागस्य महन्महत्त्वं प्रतिपादितम्। अत्र हि उद्दालकः सर्वमेधयागे स्वकीयं सर्वस्वं ब्राह्मणेभ्यः ददाति । यथा शाङ्करभाष्ये "वाजमन्नं तद्दानादि निमित्तं श्रवो यशो यस्य स इति वाजश्रवा रुदितो वा । तस्यापम्य वाजश्रवसः किल विश्वजितासर्वमेधेनेजे तत्फलं कामयमानः । स तस्मिन्कतौ सर्ववेदसं सर्वस्वं धनं ददौ दत्तवान्" [9] ।

अग्रे स्वापत्यमपि जगल्लाभाय विद्याप्राप्तये च मृत्युगृहं प्रेषयति । पुत्रोऽपि स्वशिव न काङ्क्षत्यपितु लोकोन्नतये 'श्रेयस्' इति तत्त्वं चिनोति । समयेऽस्मिन् लोभं प्रददाति मृत्युः । यथा -

"एवमुक्तोऽपि पुनः प्रलोभयन्नुवाच मृत्युः, शतं वर्षाण्यायूषि एषां तान्शतायुषः पुत्रपौत्रान् वृणीष्व । किञ्च गवादिलक्षणान् बहून् पशून् हस्तिहिरण्यं हस्ती च हिरण्यञ्च हस्तिहिरण्यम् अश्वाश्च किञ्च भूमेः पृथिव्या महद्विस्तीर्णमायतनमाश्रयं मण्डलं राज्यं वृणीष्व । किञ्च सर्वमप्येतत् अनर्थकं स्वयं चेदल्पायुरित्यत आह - स्वयं च जीव धारय शरीरं समग्रेन्द्रियकलापं शरदो वर्षाणि यावदिच्छसि जीवितुम्" [10] ।

किञ्च "एतत्तुल्यमेतेन यथोपदिष्टेन सदृशमन्यमपि यदि मन्यसे वरं तमपि वृणीष्व । किञ्च वित्तं प्रभूतं हिरण्यरत्नादि चिरजिविकां च सह वित्तेन वृणीष्वेत्येतत् । किं बहुना महत्या भूमौ राजा नचिकेतस्त्वमेधि भव । किञ्चान्यत्मकामानां दिव्यानां मानुषाणां च त्वा त्वां कामभाजं कामार्हं करोमि सत्यसङ्कल्पो ह्यहं देवः" [11] ।

एवं मृत्युनोक्ते सत्यपि नचिकेता परमतत्त्वस्य शिक्षाप्रापणाय कथयति । स समेषां तत्त्वानां क्षणभङ्गुरतामपि प्रतिपादयति ।

"न वित्तेन तपणीयो मनुष्यो, लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा ।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव" [12] ।।

अर्थात् अहं केवलं तत्त्वज्ञानमिच्छामि । भवत्पार्श्वे यानि भोग्यवस्तूनि तानि सर्वाण्यपि भवत्पार्श्वे स्युरिति । एवम्प्रकारेण नचिकेता अत्र त्यागमूर्तिरिव प्रतिभास्यते ।

**मानसिक विकास**

मनुष्येष्वेव मन उपलभ्यते । मनसः गुणा अनुभव-संवेदन-कल्पना-चिन्तन- स्मरण-धारणादयः भवन्ति । गुणानां विकासेन विना सामाजिकविकासः न सम्भवति । अर्थात् मानसिकविकास एव वर्तते लक्ष्यप्राप्तेः साधनम् । यस्य मनुष्यस्य बुद्धिः लक्ष्यम्प्रति निपुणतया सह इन्द्रियाणां नियन्त्रणाय मनः प्रेरयति स एव लक्ष्यं प्राप्नोति । अत एव मानसिकविकासे इन्द्रियाणां संयमः प्रथममुद्देश्यम् ।

"यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः" [13] ।।

मानसिक भावानां नियन्त्रणद्वारा मनुष्ये कर्त्तव्याकर्त्तव्यविवेकः समुदेति । मनुष्यस्याचरणे पवित्रताप्यागच्छति । तस्य एव गतिर्भवत्यालक्षम् ।

"यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यस्माद् भूयो न जायते [14] ।।

इन्द्रियाणां ये विषयाः ते मानसिकविकासे अवरोधमुत्पादयन्ति । अतः साधकः महत्प्रयत्नेन मानसिकोन्नयनार्थं इन्द्रियाणां गतिं शमदमादिमाध्यमेन वशे कृत्वा परं लक्ष्यं प्रातुं शक्नोति ।

अनेनेदं स्पष्टं जायते यत् कठोपनिषदीयशिक्षायाः नैकान्युद्देश्यानि सन्ति । किञ्च निहितानामुद्देश्यानां तत्र

सजीवं विवरणं प्रस्तुतम् । प्रचलितायाः शिक्षाव्यवस्थायाः विशेषणेनैतान्युद्देश्यानि प्राप्तानि ।

कठोपनिषदः शिक्षा कस्यापि कालविशेषस्य शिक्षाप्रणाली नास्त्यपितु अस्याः सिद्धान्तानां प्रयोगः सार्वकालिकः । आत्मतत्त्वस्य यत् सुस्पष्टं वर्णनं कृतं, तस्यैव श्रीमद्भगवद्गीतादिग्रन्था अनुसरणं कृत्वा स्वश्रेष्ठत्वं प्रतिपादयन्ति ।

किञ्चाधुनिकशिक्षायाः लक्ष्याणां समुचितसोपानानि प्रस्तौति कठवल्ली । सम्प्रति स्वास्थ्य-ज्ञान-विज्ञान-नैतिकता-आजीविकादीनां व्यवस्था शिक्षोपरि निर्भरा । तत्त्वानामेतेषां पूर्तिकरणे आध्यात्मिकविकासकरणे, किमप्यनिर्वचनीयतत्त्वस्य प्राप्तकरणे निश्चितरूपेण सहायिका कठशिक्षा ।

शिक्षकशिक्षार्थिसम्बन्धानां यत् स्वरूपम् उपनिषदि वर्णितं तत् कस्यापि समाजाय कस्मिन्नपि काले च आदर्शसम्बन्धानां परिकल्पना सम्प्रत्यध्यापकः स्वगरिमाणं विस्मृत्य धनलोलुपतावशात् ज्ञानकृपणः क्रियाविहीनश्चास्ति। शिक्षा नास्ति व्यापारादधिका यतोहि वर्तमाने धनस्य व्ययं कृत्वोषधीनां ग्रहणमात्रं भवति । शिक्षायाः वास्तिविकोद्देश्यानां प्राप्तिः कठिना संजाता । केवल संख्यात्मकदृष्ट्या शिक्षासम्पादनेन भारतीया परम्परा सदोषा भविष्यति । अत एवाश्यकता वर्तते प्राच्यग्रन्थानामनुसरणस्य, यत्र हि प्रत्येकस्याः समस्यायाः समाधानं वर्तते । वर्तमानयुगस्य छत्रानुशासनविभीषिकायां न्यूनीकरणस्यैकमात्रोपायः गुरुशिष्यसम्बन्धेषु समरसता-सम्पादनं वर्तते । कठोपनिषदि वर्णिताः सिद्धान्ताः एतासां समस्यानां निवारणाय आदर्शनिदर्शनानि वर्तन्ते ।

## सन्दर्भ सूची


1. कठोपनिषद – १/२/२
2. कठोपनिषद – १/२/४
3. स्वामीरङ्गनाथ - उपनिषदों की वाणी, पृष्ठ - १४२
4. कठोपनिषद – २/२/२
5. कठोपनिषद – २/२/२
6. कठोपनिषद – १/२/२९
7. कठोपनिषद – १/१/७
8. कठोपनिषद – १/१/८
9. कठोपनिषद् शाङ्कारभाष्य – १
10. कठोपनिषद् शाङ्कारभाष्य – १/१/२३
11. कठोपनिषद् शाङ्कारभाष्य – १/१/२४
12. कठोपनिषद – १/१/२७
13. कठोपनिषद – १/३/६
14. कठोपनिषद – १/३/८